

# श्री कृष्ण-चैतन्य-चन्द्रस्य-सहस्र-नाम-स्तोत्रं

|| Śrī Kṛṣṇa-Caitanya-Candrasya-Sahasra-Nāma-Stotraṁ ||

**The 1000 Names of Śrī Caitanya Mahāprabhu**

*by Kavi-Karṇapūra*

नमस्तस्मै भगवते चैतन्याय महात्मने ।
कलिकल्मषनाशाय भवाब्धितारणाय च ॥ १॥

*namas tasmai bhagavate*
*caitanyāya mahātmane |*
*kali-kalmaṣa-nāśāya*
*bhavābdhi tāraṇāya ca* || 1||

ब्रह्मणा हरिदासेन श्रीरूपाय प्रकाशितम् ।
तत्सर्वं कथयिष्यामि सावधानं निशामय ॥ २॥

*brahmaṇā hari-dāsena*
*śrī-rūpāya prakāśitam |*
*tat sarvaṁ kathayiṣyāmi*
*sāvadhānaṁ niśāmaya* || 2||

श्रुत्वैवं वैष्णवाः सर्वे प्रहृष्टाः प्रेमविह्वलाः ।

सादरं परिपप्रच्छुः प्रेमगद्गदया गिरा ॥ ३ ॥

*śrutvaivaṁ vaiṣṇavāḥ sarve*
*prahṛṣṭāḥ prema-vihvalāḥ |*
*sādaraṁ paripapracchuḥ*
*prema-gadgadayā girā || 3||*

वैष्णवानां हि कृपया स्मृत्वा वाक्यं पितुस्तदा ।
सणोन्त्य भगवद्रूपं नामानि कथयामि वै ॥ ४ ॥

*vaiṣṇavānāṁ hi kṛpayā*
*smṛtvā vākyaṁ pitus tadā |*
*saṇontya bhagavad-rūpaṁ*
*nāmāni kathayāmi vai || 4||*

**ध्यानम्** ।
ॐ अस्य श्रीकृष्णचैतन्यसहस्रनामस्तोत्रस्य
नारायणः ऋषिः अनुष्टुप् छन्दः श्रीमद्भगवद्भक्तिर्देवता
श्रीराधाकृष्णप्रीतये श्रीकृष्णचैतन्य नामसहस्रपथे विनियोगः ।
ॐ नमः प्रेमसमुच्चयाय गोपीजनवल्लभाय महात्मने ।

***dhyānam |***
*oṁ asya śrī-kṛṣṇa-caitanya*
*sahasra-nāma-stotrasya*
*nārāyaṇaḥ ṛṣiḥ anuṣṭup chandaḥ*
*śrīmad-bhagavad-bhaktir-devatā*
*śrī-rādhā-kṛṣṇa-prītaye*
*śrī-kṛṣṇa-caitanya*
*nāma-sahasra-pathe viniyogaḥ |*
*oṁ namaḥ prema-samuccayāya*
*gopījana-vallabhāya mahātmane |*

ॐ विश्वम्भरः सदानन्दो विश्वजिद्विश्वभावनः ।
महानुभावो विश्वात्मा गौराङ्गो गौरभावनः ॥ ५ ॥

*oṁ viśvambharaḥ sadānando*
*viśva-jid viśva-bhāvanaḥ |*
*mahānubhāvo viśvātmā*
*gaurāṅgo gaura-bhāvanaḥ || 5||*

हेमप्रभो दीर्घबाहुर्दीर्घग्रीवः शुचिर्वसुः ।
चैतन्यश्चेतनश्चेतश्चित्तरूपी प्रभुः स्वयम् ॥ ६ ॥

*hema-prabho dīrgha-bāhur*
*dīrgha-grīvaḥ śucir vasuḥ |*
*caitanyaś cetanaś cetaś*
*citta-rūpī prabhuḥ svayam || 6||*

राधाङ्गी राधिकाभावो राधान्वेशी प्रियंवदः ।
नीतिज्ञः सर्वधर्मज्ञो भक्तिमान् पुरुषोत्तमः ॥ ७ ॥

*rādhāṅgī rādhikā-bhāvo*
*rādhānveśī priyaṁvadaḥ |*
*nītijñaḥ sarva-dharmajño*
*bhaktimān puruṣottamaḥ || 7||*

अनुभावी महाधैर्यः शास्त्रज्ञो नित्यनूतनः ।
प्रभावी भगवान् कृष्णश्चैतन्यो रसविग्रहः ॥ ८ ॥

*anubhāvī mahādhairyaḥ*
*śāstra-jño nitya-nūtanaḥ |*
*prabhāvī bhagavān kṛṣṇaś*
*caitanyo rasa-vigrahaḥ || 8||*

अनादिनिधनो धाता धरणीमन्दनः शुचिः ।
वराङ्गश्चञ्चलो दक्षः प्रतापी साधुसङ्गतः ॥ ९ ॥

*anādi-nidhano dhātā*
*dharaṇī-mandanaḥ śuciḥ |*
*varāṅgaś cañcalo dakṣaḥ*
*pratāpī sādhu-saṅgataḥ || 9||*

उन्मादी उन्मदो वीरो धीरग्राणी रसप्रियः ।
रक्ताम्बरो दण्डधरः सन्न्यासी यतिभूषणः ॥ १० ॥

*unmādī unmado vīro*
*dhīra-grāṇī rasa-priyaḥ |*
*raktāmbaro daṇḍa-dharaḥ*
*sannyāsī yati-bhūṣaṇaḥ || 10||*

दण्डी छत्री चक्रपाणिः कृपालुः सर्वदर्शनः ।
निरायुधः सर्वशास्ता कलिदोषप्रनाशनः ॥ ११ ॥

*daṇḍī chatrī cakra-pāṇiḥ*
*kṛpāluḥ sarva-darśanaḥ |*
*nirāyudhaḥ sarva-śāstā*
*kali-doṣa-pranāśanaḥ || 11||*

गुरुवर्यः कृपासिन्धुर्विक्रमी च जनार्दनः ।
म्लेच्छग्राही कुनीतिघ्नो दुष्टहारी कृपाकुलः ॥ १२ ॥

*guru-varyaḥ kṛpā-sindhur*
*vikramī ca janārdanaḥ |*
*mleccha-grāhī kunīti-ghno*
*duṣṭa-hārī kṛpākulaḥ || 12||*

ब्रह्मचारी यतिवरो ब्रह्मण्यो ब्राह्मणः सुधीः ।
द्विजराजश्चक्रवर्ती कविः कृपणवत्सलः ॥ १३ ॥

*brahmacārī yati-varo*
*brahmaṇyo brāhmaṇaḥ sudhīḥ |*
*dvija-rājaś cakravartī*
*kaviḥ kṛpaṇa-vatsalaḥ* || 13||

निरीहः पावकोऽर्थज्ञो निर्धूमः पावकोपमः ।
नारवन्द्यो हराकारो भविष्णुर्नरनायकः ॥ १४ ॥

*nirīhaḥ pāvako'rtha-jño*
*nirdhūmaḥ pāvakopamaḥ |*
*nāra-vandyo harākāro*
*bhaviṣṇur nara-nāyakaḥ* || 14||

दानवीरो युद्धवीरो दयावीरो वृकोदरः ।
ज्ञानवीरो महावीरः शान्तिवीरः प्रतापनः ॥ १५ ॥

*dāna-vīro yuddha-vīro*
*dayā-vīro vṛkodaraḥ |*
*jñāna-vīro mahā-vīraḥ*
*śānti-vīraḥ pratāpanaḥ* || 15||

श्रीजिष्णुर्भ्रमिको जिष्णुः सहिष्णुश्चारुदर्शनः ।
नरो वरीयान् दुर्दर्शो नवद्वीपसुधाकरः ॥ १६ ॥

*śrī-jiṣṇur bhramiko jiṣṇuḥ*
*sahiṣṇuś cāru-darśanaḥ |*
*naro varīyān durdarśo*
*navadvīpa-sudhākaraḥ* || 16||

चन्द्रहास्यश्चन्द्रनखो बलिमदुदरो बली ।
सूर्यप्रभः सूर्यकांशुः सूर्याङ्गो मणिभूषणः ॥ १७ ॥

*candra-hāsyaś candra-nakho*
*balimad udaro balī |*
*sūrya-prabhaḥ sūryakāṁśuḥ*
*sūryāṅgo maṇi-bhūṣaṇaḥ* || 17||

कम्भुकण्ठः कपोलश्रीर्निम्ननाभिः सुलोचनः ।
जगन्नाथसुतो विप्रो रत्नाङ्गो रत्नभूषणः ॥ १८ ॥

*kambhu-kaṇṭhaḥ kapol-aśrīr*
*nimna-nābhiḥ sulocanaḥ |*
*jagannātha-suto vipro*
*ratnāṅgo ratna-bhūṣaṇaḥ* || 18||

तीर्थार्थी तीर्थदस्तीर्थस्तीर्थाङ्गस्तीर्थसाधकः ।
तीर्थास्पदस्तीर्थवासस्तीर्थसेवी निराश्रयः ॥ १९ ॥

*tīrthārthī tīrtha-das tīrthas*
*tīrthāṅgas tīrtha-sādhakaḥ |*
*tīrthāspadas tīrtha-vāsas*
*tīrtha-sevī nirāśrayaḥ || 19||*

तीर्थालादी तीर्थप्रदो ब्राह्मको ब्रह्मणो भ्रमी ।
श्रीवासपण्डितानन्दो रामानन्दप्रियङ्करः ॥ २० ॥

*tīrthālādī tīrtha-prado*
*brāhmako brahmaṇo bhramī |*
*śrīvāsa-paṇḍitānando*
*rāmānanda-priyaṅkaraḥ || 20||*

गदाधरप्रियो दासो विक्रमी शङ्करप्रियः ।
योगी योगप्रदो योगो योगकारी त्रियोगकृत् ॥ २१ ॥

*gadādhara-priyo dāso*
*vikramī śaṅkara-priyaḥ |*
*yogī yoga-prado yogo*
*yoga-kārī tri-yoga-kṛt || 21||*

सर्वः सर्वस्वदो भूमा सर्वाङ्गः सर्वसम्भवः ।
वाणिर्बाणायुधो वादी वाचस्पतिरयोनिजः ॥ २२ ॥

*sarvaḥ sarvas-vado bhūmā*
*sarvāṅgaḥ sarva-sambhavaḥ |*
*vāṇir bāṇāyudho vādī*
*vācaspatir ayoni-jaḥ || 22||*

बुद्धिः सत्यं बलं तेजो धृतिमान् जङ्गमकृतिः ।
मुरारिर्वर्धनो धाता नृहरिः मानवर्धनः ॥ २३ ॥

*buddhiḥ satyaṁ balaṁ tejo*
*dhṛtimān jaṅgamakṛtiḥ |*
*murārir vardhano dhātā*
*nṛhariḥ māna-vardhanaḥ || 23||*

निष्कर्मा कर्मदो नाथः कर्मज्ञः कर्मनाशकः ।
अनर्घः कारकः कर्म क्रियार्हः कर्मबाधकः ॥ २४ ॥

*niṣkarmā karma-do nāthaḥ*
*karma-jñaḥ karma-nāśakaḥ |*
*anarghaḥ kārakaḥ karma-*
*kriyārhaḥ karma-bādhakaḥ || 24||*

निर्गुणो गुणवानीशो विधाता सामगोऽजितः ।
जितश्वासो जितप्राणो जितानङ्गो जितेन्द्रियः ॥ २५ ॥

*nirguṇo guṇavān īśo*
*vidhātā sāma-go'jitaḥ |*
*jita-śvāso jita-prāṇo*
*jitānaṅgo jitendriyaḥ || 25||*

कृष्णभावी कृष्णनामी कृष्णात्मा कृष्णनायकः ।
अद्वैतो द्वैतसाहित्यो द्विभावः पालको वशी ॥ २६ ॥

*kṛṣṇa-bhāvī kṛṣṇa-nāmī*
*kṛṣṇātmā kṛṣṇa-nāyakaḥ |*
*advaito dvaita-sāhityo*
*dvi-bhāvaḥ pālako vaśī || 26||*

श्रीवासः श्रीधराहव्यो हलनायकसारवित् ।
विश्वरूपानुजश्चन्द्रो वरीयान् माधवोऽच्युतः ॥ २७ ॥

*śrīvāsaḥ śrīdharāhavyo*
*hala-nāyaka-sāra-vit |*
*viśvarūpānujaścandro*
*varīyān mādhavo'cyutaḥ || 27||*

रूपासक्तः सदाचारो गुणज्ञो बहुभावकः ।
गुणहीनो गुणातीतो गुणग्राही गुणार्णवः ॥ २८ ॥

*rūpāsaktaḥ sadācāro*
*guṇa-jño bahu-bhāvakaḥ |*
*guṇa-hīno guṇātīto*
*guṇa-grāhī guṇārṇavaḥ || 28||*

ब्रह्मानन्दो नित्यानन्दः प्रेमानन्दोऽतिनन्दकः ।
निन्द्यहारी निन्द्यवर्जी निन्द्यघ्नः परितोषकः ॥ २९ ॥

*brahmānando nityānandaḥ*
*premānando'ti-nandakaḥ |*
*nindya-hārī nindya-varjī*
*nindya-ghnaḥ paritoṣakaḥ || 29||*

यज्ञबाहुर्विनीतात्मा नामयज्ञप्रचारकः ।
कलिवर्यः सुचिनांशुः पर्यासुः पावकोपमः ॥ ३० ॥

*yajña-bāhur vinītātmā*
*nāma-yajña-pracārakaḥ |*
*kali-varyaḥ sucināṁśuḥ*
*paryāṁsuḥ pāvakopamaḥ || 30||*

हिरण्यगर्भः सूक्ष्मात्मा वैराज्यो विरजापतिः ।
विलासी प्रभावी स्वांशी परावस्थः शिरोमणिः ॥ ३१ ॥

*hiraṇya-garbhaḥ sūkṣmātmā*
*vairājyo virajā-patiḥ |*
*vilāsī prabhāvī svāṁśī*
*parāvasthaḥ śiromaṇiḥ || 31||*

मायाघ्नो मायिको मायी मायावादी विचक्षणः ।
कृष्णाच्छादी कृष्णजल्पी विषयघ्नो निराकृतिः ॥ ३२ ॥

*māyā-ghno māyiko māyī*
*māyāvādī vicakṣaṇaḥ |*
*kṛṣṇācchādī kṛṣṇa-jalpī*
*viṣaya-ghno nirākṛtiḥ || 32||*

सङ्कल्पशून्यो मायीशो मायाद्वेशी व्रजप्रियः ।
व्रजाधीशो व्रजपतिर्गोपगोकुलनन्दनः ॥ ३३ ॥

*saṅkalpa-śūnyo māyīśo*
*māyādveśī vraja-priyaḥ |*
*vrajādhīśo vraja-patir*
*gopa-gokula-nandanaḥ || 33||*

व्रजवासी व्रजभावो व्रजनायकसत्तमः ।
गुप्तप्रियो गुप्तभावो वाञ्छितः सत्कुलाश्रयः ॥ ३४ ॥

*vraja-vāsī vraja-bhāvo*
*vraja-nāyaka-sattamaḥ |*
*gupta-priyo gupta-bhāvo*
*vāñchitaḥ satkulāśrayaḥ || 34||*

रागानुगो रागसिन्धू रागात्मा रागवर्धनः ।
रागोद्गतः प्रेमसाक्षी भट्टनाथः सनातनः ॥ ३५ ॥

*rāgānugo rāga-sindhū*
*rāgātmā rāga-vardhanaḥ |*
*rāgodgataḥ prema-sākṣī*
*bhaṭṭa-nāthaḥ sanātanaḥ || 35||*

गोपालभट्टगः प्रीतो लोकनाथप्रियः पटुः ।
द्विभुजः षड्भुजो रूपी राजदर्पविनाशनः ॥ ३६ ॥

*gopāla-bhaṭṭa-gaḥ prīto*
*lokanātha-priyaḥ paṭuḥ |*
*dvi-bhujaḥ ṣaḍ-bhujo rūpī*
*rāja-darpa-vināśanaḥ || 36||*

काशिमिश्रप्रियो वन्द्यो वन्दनीयः शचिप्रसूः ।
मिश्रपुरन्दराधिसो रघुनाथप्रियो रयः ॥ ३७ ॥

*kāśi-miśra-priyo vandyo*
*vandanīyaḥ śaci-prasūḥ |*
*miśra-purandarādhiso*
*raghunātha-priyo rayaḥ || 37||*

सार्वभौमदर्पहारी अमोघारिर्वसुप्रियः ।
सहजः सहजाधीशः शाश्वतः प्रणयातुरः ॥ ३८ ॥

*sārvabhauma-darpa-hārī*
*amoghārir vasu-priyaḥ |*
*sahajaḥ sahajādhīśaḥ*
*śāśvataḥ praṇayāturaḥ || 38||*

किलकिञ्चिदभावार्तः पाण्डुगण्डः शुचातुरः ।
प्रलापी बहुवाक् शुद्धः ऋजुर्वक्रगतिः शिवः ॥ ३९ ॥

*kila-kiñcid-abhāvārtaḥ*
*pāṇḍu-gaṇḍaḥ śucāturaḥ |*
*pralāpī bahu-vāk śuddhaḥ*
*ṛjur vakragatiḥ śivaḥ || 39||*

घत्तायितोऽरविन्दाक्षः प्रेमवैचित्यलक्षकः ।
प्रियाभिमानी चतुरः प्रियावर्ती प्रियोन्मुखः ॥ ४० ॥

*ghattāyito'ravindākṣaḥ*
*prema-vaicitya-lakṣakaḥ |*
*priyābhimānī caturaḥ*
*priyāvartī priyonmukhaḥ || 40||*

लोमाञ्चितः कम्पधरः अश्रुमुखो विशोकहा ।
हास्यप्रियो हास्यकारी हास्ययुग् हास्यनागरः ॥ ४१ ॥

*lomāñcitaḥ kampa-dharaḥ*
*aśru-mukho viśoka-hā |*
*hāsya-priyo hāsya-kārī*
*hāsya-yug hāsya-nāgaraḥ || 41||*

हास्यग्रामी हास्यकरस्त्रिभङ्गी नर्तनाकुलः ।
ऊर्ध्वलोमा ऊर्ध्वहस्त ऊर्ध्वरावी विकारवान् ॥ ४२ ॥

*hāsya-grāmī hāsya-karas*
*tri-bhaṅgī nartanākulaḥ |*
*ūrdhva-lomā ūrdhva-hasta*
*ūrdhva-rāvī vikāravān || 42||*

भवोल्लासी धीरशान्तो धीरङ्गो धीरनायकः ।
देवास्पदो देवधामा देवदेवो मनोभवः ॥ ४३ ॥

*bhavollāsī dhīra-śānto*
*dhīraṅgo dhīra-nāyakaḥ |*
*devāspado deva-dhāmā*
*deva-devo manobhavaḥ || 43||*

हेमाद्रिर्हेमलावण्यः सुमेरुर्ब्रह्मसादनः ।
ऐरावतस्वर्णकान्तिः शरघ्नो वाञ्छितप्रदः ॥ ४४ ॥

*hemādrir hema-lāvaṇyaḥ*
*sumerur brahma-sādanaḥ |*
*airāvata-svarṇa-kāntiḥ*
*śara-ghno vāñchita-pradaḥ || 44||*

करोभोरूः सुदीर्घाक्षः कम्पभ्रूचक्षुनासिकः ।
नामग्रन्थी नामसङ्ख्या भावबद्धस्तृषाहरः ॥ ४५ ॥

*karobhorūḥ sudīrghākṣaḥ*
*kampa-bhrū-cakṣu-nāsikaḥ |*
*nāma-granthī nāma-saṅkhyā*
*bhāva-baddhas tṛṣā-haraḥ || 45||*

पापाकर्षी पापहारी पापघ्नः पापशोधकः ।
दर्पहा धनदोऽरिघ्नो मानहा रिपुहा मधुः ॥ ४६ ॥

*pāpākarṣī pāpa-hārī*
*pāpa-ghnaḥ pāpa-śodhakaḥ |*
*darpa-hā dhana-do'ri-ghno*
*māna-hā ripu-hā madhuḥ || 46||*

रूपहा वेशहा दिव्यो दीनबन्धुः कृपामयः ।
सुधक्षरः सुधास्वादी सुधामा कमनीयकः ॥ ४७ ॥

*rūpa-hā veśa-hā divyo*
*dīna-bandhuḥ kṛpāmayaḥ |*
*sudhakṣaraḥ sudhāsvādī*
*sudhāmā kamanīyakaḥ || 47||*

निर्मुक्तो मुक्तिदो मुक्तो मुक्ताख्यो मुक्तिबाधकः ।
निःशङ्को निरहङ्कारो निर्वैरो विपदापहः ॥ ४८ ॥

*nirmukto mukti-do mukto*
*muktākhyo mukti-bādhakaḥ |*
*niḥśaṅko nirahaṅkāro*
*nirvairo vipadāpahaḥ || 48||*

विदग्धो नवलावण्यो नवद्वीपद्विज प्रभुः ।
निरङ्कुशो देववन्द्यः सुराचार्यः सुरारिहा ॥ ४९ ॥

*vidagdho nava-lāvaṇyo*
*navadvīpa-dvija prabhuḥ |*
*niraṅkuśo deva-vandyaḥ*
*surācāryaḥ surāri-hā || 49||*

सुरवर्यो निन्द्यहारी वादघ्नः परितोषकः ।
सुप्रकाशो बृहद्बाहुर्मित्रज्ञः कविभूषणः ॥ ५० ॥

*sura-varyo nindya-hārī*
*vāda-ghnaḥ paritoṣakaḥ |*
*suprakāśo bṛhad-bāhur*
*mitra-jñaḥ kavi-bhūṣaṇaḥ || 50||*

वरप्रदो वरपाङ्गो वरयुग् वरनायकः ।
पुष्पहासः पद्मगन्धिः पद्मरागः प्रजागरः ॥ ५१ ॥

*vara-prado varapāṅgo*
*vara-yug vara-nāyakaḥ |*
*puṣpa-hāsaḥ padma-gandhiḥ*
*padma-rāgaḥ prajāgaraḥ || 51||*

ऊर्ध्वगः सत्पथाचारी प्राणद ऊर्ध्वगायकः ।
जनप्रियो जनाह्लादो जनकऋषि जनस्पृहः ॥ ५२ ॥

*ūrdhva-gaḥ satpathācārī*
*prāṇa-da ūrdhva-gāyakaḥ |*
*jana-priyo janāhlādo*
*janakaṛṣi jana-spṛhaḥ || 52||*

अजन्मा जन्मनिलयो जनानदो जनार्द्रधीः ।
जगन्नाथो जगद्बन्धुर्जगद्देवो जगत्पतिः ॥ ५३ ॥

*ajanmā janmanilayo*
*janānado janārdra-dhīḥ |*
*jagan-nātho jagad-bandhur*
*jagad-devo jagat-patiḥ || 53||*

जनकारी जनामोदो जनकानन्दसाग्रहः ।
कलिप्रियः कलिश्लाघ्यः कलिमानविवर्धनः ॥ ५४ ॥

*janakārī janāmodo*
*janakānanda-sāgrahaḥ |*
*kali-priyaḥ kali-ślāghyaḥ*
*kali-māna-vivardhanaḥ || 54||*

कलिवर्यः सदानन्दः कलिकृत् कलिधन्यमान् ।
वर्धामनः श्रुतिधरः वर्धनो वृद्धिदायकः ॥ ५५ ॥

*kali-varyaḥ sadānandaḥ*
*kali-kṛt kali-dhanyamān |*
*vardhāmanaḥ śruti-dharaḥ*
*vardhano vṛddhi-dāyakaḥ* || 55||

सम्पदः शारणो दक्षो घृणाङ्गी कलिरक्षकः ।
कलिधन्यः समयज्ञः कलिपुण्यप्रकाशकः ॥ ५६ ॥

*sampadaḥ śāraṇo dakṣo*
*ghṛṇāṅgī kali-rakṣakaḥ |*
*kali-dhanyaḥ samaya-jñaḥ*
*kali-puṇya-prakāśakaḥ* || 56||

निश्चिन्तो धीरललितो धीरवाक् प्रेयसीप्रियः ।
वामास्पर्शी वामभावो वामरूपो मनोहरः ॥ ५७ ॥

*niścinto dhīra-lalito*
*dhīra-vāk preyasī-priyaḥ |*
*vāmāsparśī vāma-bhāvo*
*vāma-rūpo manoharaḥ* || 57||

अतीन्द्रियः सुराध्यक्षो लोकाध्यक्षः कृतकृतः ।
युगादिकृद् युगकरो युगज्ञो युगनायकः ॥ ५८ ॥

*atīndriyaḥ surādhyakṣo*
*lokādhyakṣaḥ kṛtakṛtaḥ |*
*yugādi-kṛd yuga-karo*
*yuga-jño yuga-nāyakaḥ* || 58||

युगावर्तो युगासीमः कालवान् कालशक्तिधृक् ।
प्रणयः शाश्वतो हृष्टो विश्वजिद् बुद्धिमोहनः ॥ ५९ ॥

*yugāvarto yugāsīmaḥ*
*kālavān kāla-śakti-dhṛk |*
*praṇayaḥ śāśvato hṛṣṭo*
*viśva-jid buddhi-mohanaḥ* || 59||

सन्ध्याता ध्यानकृद् ध्यानी ध्यानमङ्गलसन्धिमान् ।
विस्रुतात्मा हृदिस्थिर ग्रामनियप्रग्राहकः ॥ ६० ॥

*sandhyātā dhyāna-kṛd dhyānī*
*dhyāna-maṅgala-sandhimān |*
*visrutātmā hṛdi sthira-*
*grāmaniya-pragrāhakaḥ* || 60||

स्वरमूर्च्छी स्वरालापी स्वरमूर्तिविभूषणः ।
गानग्राही गानलुब्धो गायको गानवर्धनः ॥ ६१ ॥

*svara-mūrcchī svarālāpī*
*svara-mūrti-vibhūṣaṇaḥ |*
*gāna-grāhī gāna-lubdho*
*gāyako gāna-vardhanaḥ || 61||*

गानमान्यो ह्यप्रमेयः सत्कर्ता विश्वधृक् सहः ।
क्षीराब्धिकमथाकारः प्रेमगर्भझषाकृतिः ॥ ६२ ॥

*gāna-mānyo hy aprameyaḥ*
*satkartā viśva-dhṛk sahaḥ |*
*kṣīrābdhi-kamathākāraḥ*
*prema-garbha-jhaṣākṛtiḥ || 62||*

बीभत्सुर्भावहृदयः अदृश्यो बर्हिदर्शकः ।
ज्ञानरुद्धो धीरबुद्धिरखिलात्मप्रियः सुधीः ॥ ६३ ॥

*bībhatsur bhāva-hṛdayaḥ*
*adṛśyo barhi-darśakaḥ |*
*jñāna-ruddho dhīra-buddhir*
*akhilātma-priyaḥ sudhīḥ || 63||*

अमेयः सर्वविद्भानुर्बभ्रूर्बहुशिरो रुचिः ।
उरुश्रवाः महादीर्घो वृषकर्मा वृषाकृतिः ॥ ६४ ॥

*ameyaḥ sarva-vid bhānur*
*babhrūr bahu-śiro ruciḥ |*
*uru-śravāḥ mahā-dīrgho*
*vṛṣa-karmā vṛṣākṛtiḥ || 64||*

श्रुतिस्मृतिधरो वेदः श्रुतिज्ञः श्रुतिबाधकः ।
हृदिस्पृश आस आत्मा श्रुतिसारो विचक्षणः ॥ ६५ ॥

*śruti-smṛti-dharo vedaḥ*
*śruti-jñaḥ śruti-bādhakaḥ |*
*hṛdi spṛśa āsa ātmā*
*śruti-sāro vicakṣaṇaḥ || 65||*

कलापी निरनुग्राही वैद्यविद्याप्रचारकः ।
मीमांसकारिर्वेदाङ्ग वेदार्थप्रभवो गतिः ॥ ६६ ॥

*kalāpī niranugrāhī*
*vaidya-vidyā-pracārakaḥ |*
*mīmāṁsakārir vedāṅga*
*vedārtha-prabhavo gatiḥ || 66||*

परावरज्ञो दुष्पारो विरहाङ्गी सतां गतिः ।
असङ्ख्येयोऽप्रमेयात्मा सिद्धिदः सिद्धिसाधनः ॥ ६७ ॥

*parāvara-jño duṣpāro*
*virahāṅgī satāṁ gatiḥ |*
*asaṅkhyeyo'prameyātmā*
*siddhi-daḥ siddhi-sādhanaḥ || 67||*

धर्मसेतुर्धर्मपरो धर्मात्मा धर्मभावनः ।
उदीर्णसंशयच्छिन्नो विभूतिः शाश्वतः स्थिरः ॥ ६८ ॥

*dharma-setur dharma-paro*
*dharmātmā dharma-bhāvanaḥ |*
*udīrṇa-saṁśaya-cchinno*
*vibhūtiḥ śāśvataḥ sthiraḥ || 68||*

शुद्धात्मा शोभनोत्कण्ठोऽनिर्देश्यः साधनप्रियः ।
ग्रन्थप्रियो ग्रन्थमयः शास्त्रयोनिर्महाशयः ॥ ६९ ॥

*śuddhātmā śobhanotkaṇṭho*
*'nirdeśyaḥ sādhana-priyaḥ |*
*grantha-priyo granthamayaḥ*
*śāstra-yonir mahāśayaḥ || 69||*

अवर्णो वर्णनिलयो नाश्रमी चतुराश्रमः ।
अविप्र विप्रकृत् स्तुत्यो राजन्यो राज्यनाशकः ॥ ७० ॥

*avarṇo varṇa-nilayo*
*nāśramī catur-āśramaḥ |*
*avipra vipra-kṛt stutyo*
*rājanyo rājya-nāśakaḥ || 70||*

अवश्यो वश्यताधीनः श्रीभक्तिव्यवसायकः ।
मनोजवः पुरयिता भक्तिकीर्तिरनामयः ॥ ७१ ॥

*avaśyo vaśyatādhīnaḥ*
*śrī-bhakti-vyavasāyakaḥ |*
*manojavaḥ purayitā*
*bhakti-kīrtir anāmayaḥ || 71||*

निधिवर्जी भक्तिनिधिर्दुर्लभो दुर्गभावकृत् ।
कर्तनीः कीर्तिरतुलः अमृतो मुरजप्रियः ॥ ७२ ॥

*nidhi-varjī bhakti-nidhir*
*durlabho durga-bhāva-kṛt |*
*karta nīḥ kīrtir atulaḥ*
*amṛto muraja-priyaḥ || 72||*

शृङ्गारः पञ्चमो भावो भावयोनिरनन्तरः ।
भक्तिजित् प्रेमभोजी च नवभक्तिप्रचारकः ॥ ७३ ॥

*śṛṅgāraḥ pañcamo bhāvo*
*bhāva-yonir anantaraḥ |*
*bhakti-jit prema-bhojī ca*
*nava-bhakti-pracārakaḥ || 73||*

त्रिगर्तस्त्रिगुणामोदत्रिवाञ्छी प्रीतिवर्धनः ।
नियन्ता श्रमगोऽतीतः पोषणो विगतज्वरः ॥ ७४ ॥

*tri-gartas tri-guṇāmodas*
*tri-vāñchī prīti-vardhanaḥ |*
*niyantā śrama-go'tītaḥ*
*poṣaṇo vigata-jvaraḥ || 74||*

प्रेमज्वरो विमानार्हः अर्थहा स्वप्ननाशनः ।
उत्तारणो नामपुण्यः पापपुण्यविवर्जितः ॥ ७५ ॥

*prema-jvaro vimānārhaḥ*
*artha-hā svapna-nāśanaḥ |*
*uttāraṇo nāma-puṇyaḥ*
*pāpa-puṇya-vivarjitaḥ || 75||*

अपराधहरः पाल्यः स्वस्तिदः स्वस्तिभूषणः ।
पूतात्मा पूतगः पूतः पूतभावो महास्वनः ॥ ७६ ॥

*aparādha-haraḥ pālyaḥ*
*svasti-daḥ svasti-bhūṣaṇaḥ |*
*pūtātmā pūta-gaḥ pūtaḥ*
*pūta-bhāvo mahā-svanaḥ || 76||*

क्षेत्रज्ञः क्षेत्रविजयी क्षेत्रवासो जगत्प्रसूः ।
भयहा भयदो भास्वान् गौणभावसमन्वितः ॥ ७७ ॥

*kṣetra-jñaḥ kṣetra-vijayī*
*kṣetra-vāso jagat-prasūḥ |*
*bhaya-hā bhaya-do bhāsvān*
*gauṇa-bhāva-samanvitaḥ || 77||*

मण्डितो मण्डलकरो वैजयन्तीपवित्रकः ।
चित्राङ्गश्चित्रितश्चित्रो भक्तचित्तप्रकाशकः ॥ ७८ ॥

*maṇḍito maṇḍala-karo*
*vaijayantī-pavitrakaḥ |*
*citrāṅgaś citritaś citro*
*bhakta-citta-prakāśakaḥ || 78||*

बुद्धिगो बुद्धिदो बुद्धिर्बुद्धिधृग् बुद्धिवर्धनः ।
प्रेमाद्रिधृक् प्रेमवहो रतिवोढ रतिस्पृशः ॥ ७९ ॥

*buddhi-go buddhi-do buddhir*
*buddhi-dhṛg buddhi-vardhanaḥ |*
*premā-dridhṛk prema-vaho*
*rati-voḍha rati-spṛśaḥ || 79||*

प्रेमचक्षुः प्रेमगह्वः प्रेमहृत् प्रेमपूरकः ।
गम्भीरगो बहिर्वासो भावानुष्ठितगो पतिः ॥ ८० ॥

*prema-cakṣuḥ prema-gahnaḥ*
*prema-hṛt prema-pūrakaḥ |*
*gambhīra-go bahir vāso*
*bhāvānuṣṭhita-go patiḥ || 80||*

नैकरूपो नैकभावो नैकात्मा नैकरूपधृक् ।
श्लथसन्धिः क्षीणधर्मस्त्यक्तपाप उरुश्रवः ॥ ८१ ॥

*naika-rūpo naika-bhāvo*
*naikātmā naika-rūpa-dhṛk |*
*ślatha-sandhiḥ kṣīṇa-dharmas*
*tyakta-pāpa uru-śravaḥ || 81||*

उरुगाय उरुग्रीव उरुभाव उरुक्रमः ।
निर्धूतो निर्मलो भावो निरीहो निरनुग्रहः ॥ ८२ ॥

*uru-gāya uru-grīva*
*uru-bhāva uru-kramaḥ |*
*nirdhūto nirmalo bhāvo*
*nirīho niranugrahaḥ || 82||*

निर्धूमोऽग्निः सुप्रतापस्तीव्रतापो हुताशनः ।
एको महद्भूतव्यापी पृथग्भूतः अनेकशः ॥ ८३ ॥

*nirdhūmo'gniḥ supratāpas*
*tīvra-tāpo hutāśanaḥ |*
*eko mahad-bhūta-vyāpī*
*pṛthag-bhūtaḥ anekaśaḥ || 83||*

निर्णयी निरनुज्ञातो दुष्टग्रामनिवर्तकः ।
विप्रबन्धुः प्रियो रुच्यो रोचकाङ्गो नराधिपः ॥ ८४ ॥

*nirṇayī niranujñāto*
*duṣṭa-grāma-nivartakaḥ |*
*vipra-bandhuḥ priyo rucyo*
*rocakāṅgo narādhipaḥ || 84||*

लोकाध्यक्षः सुवर्णाभः कनकाङ्गः शिखामणिः ।
हेमकुम्भो धर्मसेतुर्लोकनाथो जगद्गुरुः ॥ ८५ ॥

*lokādhyakṣaḥ suvarṇābhaḥ*
*kanakābjaḥ śikhāmaṇiḥ |*
*hema-kumbho dharma-setur*
*loka-nātho jagadguruḥ || 85||*

लोहिताक्षो नामकर्मा भावस्थो हृद्गुहाशयः ।
रसप्राणो रतिज्येष्ठो रसाब्धिरतिराकुलः ॥ ८६ ॥

*lohitākṣo nāma-karmā*
*bhāva-stho hṛd-guhāśayaḥ |*
*rasa-prāṇo rati-jyeṣṭho*
*rasābdhi-ratir ākulaḥ || 86||*

भावसिन्धुर्भक्तिमेघो रसवर्षी जनाकुलः ।
पीताब्जो नीलपीताभो रतिभोक्ता रसायनः ॥ ८७ ॥

*bhāva-sindhur bhakti-megho*
*rasa-varṣī janākulaḥ |*
*pītābjo nīla-pītābho*
*rati-bhoktā rasāyanaḥ || 87||*

अव्यक्तः स्वर्णराजीवो विवर्णी साधुदर्शनः ।
अमृत्युः मृत्युदोऽरुद्धः सन्धाता मृत्युवञ्चकः ॥ ८८ ॥

*avyaktaḥ svarṇa-rājīvo*
*vivarṇī sādhu-darśanaḥ |*
*amṛtyuḥ mṛtyu-do 'ruddhaḥ*
*sandhātā mṛtyu-vañcakaḥ || 88||*

प्रेमोन्मत्तः कीर्तनर्त्तः सङ्कीर्तनपिता सुरः ।
भक्तिग्रामः सुसिद्धार्थः सिद्धिदः सिद्धिसाधनः ॥ ८९ ॥

*premonmattaḥ kīrtanarttaḥ*
*saṅkīrtana-pitā suraḥ |*
*bhakti-grāmaḥ susiddhārthaḥ*
*siddhi-daḥ siddhi-sādhanaḥ || 89||*

प्रेमोदरः प्रेमवाहू लोकभर्ता दिशाम्पतिः ।
अन्तः कृष्णो बहिर्गौरो दर्शको रतिविस्तरः ॥ ९० ॥

*premodaraḥ prema-vāhū*
*loka-bhartā diśāmpatiḥ |*
*antaḥ kṛṣṇo bahir gauro*
*darśako rati-vistaraḥ || 90||*

सङ्कल्पसिद्धो वाञ्छात्मा अतुलः सच्छरीरभृत् ।
ऋद्धार्थः करुणापाङ्गो नदकृद् भक्तवत्सलः ॥ ९१ ॥

*saṅkalpa-siddho vāñchātmā*
*atulaḥ sac-charīra-bhṛt |*
*ṛddhārthaḥ karuṇāpāṅgo*
*nada-kṛd bhakta-vatsalaḥ* || 91||

अमत्सरः परानन्दः कौपीनी भक्तिपोषकः ।
अकैतवो नाममाली वेगवान् पूर्णलक्षणः ॥ ९२ ॥

*amatsaraḥ parānandaḥ*
*kaupīnī bhakti-poṣakaḥ |*
*akaitavo nāma-mālī*
*vegavān pūrṇa-lakṣaṇaḥ* || 92||

मिताशनो विवर्ताक्षो व्यवसाया व्यवस्थितः ।
रतिस्थानो रतिवनः पश्चात्तुष्टः शमाकुलः ॥ ९३ ॥

*mitāśano vivartākṣo*
*vyavasāyā vyavasthitaḥ |*
*rati-sthāno rati-vanaḥ*
*paścāt tuṣṭaḥ śamākulaḥ* || 93||

क्षोभणो विरभो मार्गो मार्गधृग् वर्त्मदर्शकः ।
नीचाश्रमी नीचमानी विस्तारो बीजमव्ययः ॥ ९४ ॥

*kṣobhaṇo virabho mārgo*
*mārga dhṛg vartma-darśakaḥ |*
*nīcāśramī nīca mānī*
*vistāro bījam avyayaḥ* || 94||

मोहकायः सूक्ष्मगतिर्महेज्यः सत्त्ववर्धनः ।
सुमुखः स्वापनोऽनादिः सुकृत् पापविदारणः ॥ ९५ ॥

*moha-kāyaḥ sūkṣma-gatir*
*mahejyaḥ sattra-vardhanaḥ |*
*sumukhaḥ svāpano'nādiḥ*
*sukṛt pāpa-vidāraṇaḥ* || 95||

श्रीनिवासो गभीरात्मा शृङ्गारकनकादृतः ।
गभीरो गहनो वेधा साङ्गोपाङ्गो वृषप्रियः ॥ ९६ ॥

*śrīnivāso gabhīrātmā*
*śṛṅgāra-kanakādṛtaḥ |*
*gabhīro gahano vedhā*
*sāṅgopāṅgo vṛṣa-priyaḥ* || 96||

उदीर्णरागो वैचित्री श्रीकरः स्तवनार्हकः ।
अश्रुचक्षुर्जलाब्यङ्ग पूरितो रतिपूरकः ॥ ९७ ॥

*udīrṇa-rāgo vaicitrī*
*śrīkaraḥ stavanārhakaḥ |*
*aśru-cakṣur jalābyaṅga*
*pūrito rati-pūrakaḥ || 97||*

स्तोत्रायणः स्तवाध्यक्षः स्तवनीयः स्तवाकुलः ।
ऊर्ध्वरेतः सन्निवासः प्रेममूर्तिः शतानलः ॥ ९८ ॥

*stotrāyaṇaḥ stavādhyakṣaḥ*
*stavanīyaḥ stavākulaḥ |*
*ūrdhva-retaḥ sannivāsaḥ*
*prema-mūrtiḥ śatānalaḥ || 98||*

भक्तबन्धुर्लोकबन्धुः प्रेमबन्धुः शताकुलः ।
सत्यमेधा श्रुतिधरः सर्वशास्त्रभृतांवरः ॥ ९९ ॥

*bhakta-bandhur loka-bandhuḥ*
*prema-bandhuḥ śatākulaḥ |*
*satya-medhā śruti-dharaḥ*
*sarva-śastra-bhṛtāṁvaraḥ || 99||*

भक्तिद्वारो भक्तिगृहः प्रेमागारो निरोधहा ।
उद्घूर्णो घूर्णितमना आघूर्नितकलेवरः ॥ १०० ॥

*bhakti-dvāro bhakti-gṛhaḥ*
*premāgāro nirodha-hā |*
*udghūrṇo ghūrṇita-manā*
*āghūrnita-kalevaraḥ || 100||*

भवभ्रान्तिजसन्देहः प्रेमराशिः शुचापहः ।
कृपाचार्यः प्रेमसङ्गो वयुनः स्थिरयौवनः ॥ १०१ ॥

*bhava-bhrānti-ja-sandehaḥ*
*prema-rāśiḥ śucāpahaḥ |*
*kṛpācāryaḥ prema-saṅgo*
*vayunaḥ sthira-yauvanaḥ || 101||*

सिन्धुगः प्रेमसङ्गाहः प्रेमवश्यो विचक्षणः ।
पद्मकिञ्जल्कसङ्काशः प्रेमादारो नियामकः ॥ १०२ ॥

*sindhu-gaḥ prema-saṅgāhaḥ*
*prema-vaśyo vicakṣaṇaḥ |*
*padma-kiñjalka-saṅkāśaḥ*
*premādāro niyāmakaḥ || 102||*

विरक्तो विगतारातिर्नापेक्षो नारदद्दतः ।
नतस्थो दक्षिणः क्षामः शठजीवप्रतारकः ॥ १०३ ॥

*virakto vigatārātir*
*nāpekṣo nāradadṛtaḥ |*
*nata-stho dakṣiṇaḥ kṣāmaḥ*
*śaṭha-jīva-pratārakaḥ || 103||*

नामप्रवर्तकोऽनर्थो धर्मोगुर्वादिपुरुषः ।
न्यग्रोधो जनको जातो वैनत्यो भक्तिपादपः ॥ १०४ ॥

*nāma-pravartako'nartho*
*dharmo-gurv-ādi-puruṣaḥ |*
*nyag-rodho janako jāto*
*vainatyo bhakti-pāda-paḥ || 104||*

आत्ममोहः प्रेमलीधः आत्मभावानुगो विराट् ।
माधुर्यवत् स्वात्मरतो गौरख्यो विप्ररूपधृक् ॥ १०५ ॥

*ātma-mohaḥ prema-līdhaḥ*
*ātma-bhāvānugo virāṭ |*
*mādhurya-vat svātma-rato*
*gaurakhyo vipra-rūpa-dhṛk || 105||*

राधारूपी महाभावी राध्यो राधनतत्परः ।
गोपीनाथात्मकोऽदृश्यः स्वाधिकारप्रसाधकः ॥ १०६ ॥

*rādhā rūpī mahā-bhāvī*
*rādhyo rādhana-tatparaḥ |*
*gopīnāthātmako'dṛśyaḥ*
*svādhikāra-prasādhakaḥ || 106||*

नित्यास्पदो नित्यरूपी नित्यभावप्रकाशकः ।
सुस्थभावश्चपलधीः स्वच्छगो भक्तिपोषकः ॥ १०७ ॥

*nityāspado nitya rūpī*
*nitya-bhāva-prakāśakaḥ |*
*sustha-bhāvaś capala-dhīḥ*
*svaccha-go bhakti-poṣakaḥ || 107||*

सर्वत्रगस्तीर्थभूतो हृदिस्थः कमलासनः ।
सर्वभावानुगाधीशः सर्वमङ्गलकारकः ॥ १०८ ॥

*sarvatra-gas tīrtha-bhūto*
*hṛdi-sthaḥ kamalāsanaḥ |*
*sarva-bhāvānugādhīśaḥ*
*sarva-maṅgala-kārakaḥ || 108||*

इत्येतत्कथितं नित्यं साहस्रं नामसुन्दरम् ।
गोलोकवासिनो विष्णोर्गौररूपस्य शार्ङ्गिनः ॥ १०९ ॥

*ity etat kathitaṁ nityaṁ*
*sāhasraṁ nāma-sundaram |*
*goloka-vāsino viṣṇor*
*gaura rūpasya śārṅginaḥ || 109||*

इदं गौरसहस्राख्याम् आमयघ्नं शुचापहम् ।
प्रेमभक्तिप्रदं नृणां गोविन्दाकर्षकं परम् ॥ ११० ॥

*idaṁ gaura-sahasrākhyām*
*āmaya-ghnaṁ śucāpaham |*
*prema-bhakti-pradaṁ nṛṇāṁ*
*govindākarṣakaṁ param || 110||*

प्रातःकाले च मध्याह्ने सन्ध्यायां मध्यरात्रिके ।
यः पठेत्प्रयतो भक्त्या चैतन्ये लभते रतिम् ॥ १११ ॥

*prātaḥ-kāle ca madhyāhne*
*sandhyāyāṁ madhya-rātrike |*
*yaḥ paṭhet prayato bhaktyā*
*caitanye labhate ratim || 111||*

नामात्मको गौरदेवो यस्य चेतसि वर्तते ।
स सर्वं विषयं त्यक्त्वा भावानन्दो भवेद्ध्रुवम् ॥ ११२ ॥

*nāmātmako gaura-devo*
*yasya cetasi vartate |*
*sa sarvaṁ viṣayaṁ tyaktvā*
*bhāvānando bhaved dhruvam || 112||*

यस्मै कस्मै न दातव्यम् दाने तु भक्तिहा भवेत् ॥
विनीताय प्रशान्ताय गौरभक्ताय धीमते ॥ ११३ ॥

*yasmai kasmai na dātavyam*
*dāne tu bhakti-hā bhavet |*
*vinītāya praśāntāya*
*gaura-bhaktāya dhīmate || 113||*


। तस्मै देयं ततो ग्राह्यमिति वैष्णवशासनम् ।

*| tasmai deyaṁ tato grāhyam iti vaiṣṇava-śāsanam |*

॥ इति श्रीकविकर्णपूरविरचितम्
श्रीकृष्णचैतन्यचन्द्रस्यसहस्रनामस्तोत्रं संपूर्णम् ॥

॥ *iti śrī kavi-karṇapūra-viracitam*
*śrī kṛṣṇa-caitanya-candrasya sahasra-nāma-stotraṁ*
*saṁpūrṇam* ॥

*Thus ends the sacred hymn of the Thousand Names*
*of Śrī Kṛṣṇa-Caitanya as composed by Kavi-Karṇapūra*



भज गौराङ्ग कोहो गौराङ्ग लोहो गौराङ्गेर नाम रे
भज गौराङ्ग भज गौराङ्ग भज गौराङ्ग नाम रे

*bhaja gaurāṅga, koho gaurāṅga*
*loho gaurāṅgera nāma re*
*bhaja gaurāṅga, bhaja gaurāṅga*
*bhaja gaurāṅga nāma re*

*(Kṛṣṇadasa Kavirājā)*

"Just shout the name 'Gaurāṅga! Gaurāṅga! Gaurāṅga!' and dance with abandon. The happiness that I am giving is beyond compare. This transcendental happiness is pure, positive, ecstatic, eternal spiritual bliss. It is totally beyond illusion." (NDM)

Worship Gaurāṅga! Speak Gaurāṅga! And chant the name of Gaurāṅga! Worship Gaurāṅga, worship the name of Gaurāṅga! (CB)